स्वतन्त्रतादिवसमधिकृत्य विशेषकार्यक्रमः

# **प्रतिवेदनम् (Report)**

स्वस्ति श्रीपराभवनामसंवत्सरस्य दक्षिणायने श्रावणमासे शुक्लपक्षे तृतीयायां तिथौ शनिवासरयुतायां (१५-अगस्त-२०२६) प्रातः ८:३० वादने महाविद्यालयस्य सर्वेषां छात्राणाम् उपस्थितौ आदरणीयेन निदेशकेन ध्वजारोहणम् अक्रियत। तदुत्तरं श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रे स्वतन्त्रतादिवसमधिकृत्य विशेषकार्यक्रमः आयोजितः आसीत्। स्वतन्त्रता दिवसस्य महत्त्वमधिकृत्य परिचयभाषणेन-कार्यक्रमस्य प्रारम्भः जातः। तदनन्तरं मङ्गलम् आचरितम्।

मञ्चे मुख्यातिथिरूपेण राष्ट्रियसंस्कृतविश्वविद्यालयस्य (तिरुपतितः) परीक्षाधिकारी डॉ. रमाकान्तमिश्रमहोदयाः, दूरस्थशिक्षाधिकारी डॉ. भरतभूषणमहोदयाश्च आसन्। परिसरस्य निदेशकः डॉ. सुब्बराय वि. भट्टमहोदयाः, शिक्षाशास्त्रविभागस्य अध्यक्षः डॉ. बालाजीमहोदयाः, व्याकरणविभागस्य सहायकप्राध्यापकाः डॉ. पद्मनाभवर्याश्च उपस्थिताः आसन्। तेषां सर्वेषां स्वागतं व्याहृत्य सभाकार्यक्रमः प्रारब्धः। ततः छात्रैः क्रान्तिकारिणः मदनलालधींग्रामहोदयस्य जीवनचरितमधिकृत्य भाषणम् कृतम्। तदुत्तरं देशभक्तिगीतम् "वन्दे मातरम्" अगीयत। छात्राः सोत्साहम् अस्मिन् कार्यक्रमे भागम् अगृह्णन्। ते स्वरचितं देशभक्तिगीतं, सामूहिकनृत्यं (गणनृत्यं) च प्रादर्शयन्।

अग्रिमे चरणे शिक्षाशास्त्रविभागस्य अध्यक्षः डॉ. बालाजीमहोदयः स्वतन्त्रतादिवसस्य महत्त्वमधिकृत्य भाषणम् अकरोत्। व्याकरणविभागस्य सहायकप्राध्यापकः डॉ. पद्मनाभवर्यः आङ्ग्लभाषया 'स्वतन्त्रभारते ए.पी.जे. अब्दुल्-कलामस्य विचारधारा तत्र छात्राणां योगदानञ्च' इति विषये विचारान् प्रास्तौत्। तदनन्तरम् आदरणीयाः कुलपतिमहोदयाः आन्तर्जालिकमाध्यमेन (Online) 'अद्यतनमहत्त्वम्, तत्र छात्राणां कर्तव्यम्, अस्माकं संस्कृतिः, भारतीयज्ञानपरम्परा तथा तस्याः संरक्षणम्' इति विषयमधिकृत्य ओजस्वि भाषणम् अकुर्वन्।

ततः आगतौ मुख्यातिथिवर्यौ परिसरेऽस्मिन् स्वकीयमधुरानुभवान् तथा मातृभूमिविषये छात्राणां कर्तव्यं च बोधितवन्तः। पश्चात् परिसरस्य निदेशकवर्याः अपि छात्रान् उद्दिश्य कानिचन प्रेरणदायकवचनानि उदबोधयन्। तदुत्तरम् आगतवद्भ्यः मुख्यातिथिवर्येभ्यः सम्माननं च कृतम्।

अन्ते धन्यवादसमर्पणेन कार्यक्रमस्य अन्तिमघट्टः प्राप्तः। ततः शान्तिमन्त्रेण मधुरवितरणेन च कार्यक्रमः साफल्येन सम्पन्नः।